# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| कक्षा – शास्त्री | प्रश्नपत्रम् – ८ | गुणाः – ५० |
|---|---|---|
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – महाभाष्यम्, भूषणसारः च | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ अधस्तनेषु कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या।** **१०**

१ च्लि लुङि सूत्रमिदं भाष्यमतानुसारं व्याख्यायत।

२ इदित्करणं सामन्यग्रहणार्थमित्यत्र भाष्यमतं व्याख्यायत।

३ च्लेः सिच् सूत्रे चकारप्रयोजनं व्याख्यायत।

**प्रश्नः २ श्लिष आलिङ्गने सूत्रे किमर्थम् 'आ' इति प्रतिपादयत।** **१०**

**प्रश्नः ३ अस्यतिव्यक्तिख्यातिभ्योऽङ् सूत्रेऽस्यति ग्रहणं किमर्थं भाष्यमतं स्पष्टयत।** **१०**

**प्रश्नः ४ अधस्तनेषु कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या।** **१०**

१ कर्मवत्कर्मणा तुल्यक्रियः सूत्रे वत्करणं किमर्थमिति व्याख्यायत।

२ न दुहस्नुनमां यक्चिणौ सूत्रे यक्चिणौ भाष्यमतानुसारं व्याख्यायत।

३ धातोः सूत्रे आकुतोऽयं धात्वधिकारः भाष्यमतानुसारं व्याख्यायत।

**प्रश्नः ५ तत्रोपपदं सप्तमीस्थं सूत्रे स्थग्रहणं प्रतिपादयत।** **१०**

**प्रश्नः ६ कृदतिङ् सूत्रे 'अतिङ्' इति आक्षेपं सम्यगवबोधयत।** **१०**

**प्रश्नः ७ अधस्तनेषु कयोश्चित् द्वयोः व्याख्या कार्या।** **१०**

१ एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः।।

२ द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः।

३ अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।

**प्रश्नः ८ शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा** **१०**
**नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते।। शास्त्रानुसारेण विवेचयत।**

**प्रश्नः ९ न प्रातिपदिकं, नापि पदं साधु। शास्त्रानुसारेण विवेचयत।** **१०**

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।** **१०**

१ क्वायं च्लिः श्रूयते?

२ किमर्थः सिच् मध्ये चकारः?

३ क्सविधाने इगुपधाभावः कथम्?

४ किमर्थमालिङ्गने 'आ' उच्यते?

५ अस्यति व्यक्तिख्यातिभ्योऽङ् सूत्रे अस्यति ग्रहणम्?

६ कर्मवत्कर्मणा तुल्यक्रियः सूत्रे वत्करणं किमर्थम्?

७ धातोः सूत्रस्याधिकारः कुत्र यावत्?

८ तत्रोपपदिमिति सूत्रे 'तत्र' पदं किमर्थम्?

९ उपपदसंज्ञायां कं ग्रहणं क्रियते?

१० व्यत्ययोः बहुलं सूत्रे व्यत्ययस्य कोऽर्थः?

११ एकं द्विकं त्रिकं मध्ये कस्य बोधः?

१२ शब्दस्य कः सम्बन्धः न व्यभिचरति?

१३ न सोऽस्ति ..... लोके इति पूरयत।

१४ ज्ञानं सर्वं केन भासते?

१५ वैयाकरणभूषणसारः ग्रन्थस्य कर्ता कः?

****